# ॥ अथ सर्पसंस्कारविधिः प्रारंभः ॥

श्रीगणेशाय नमः ॥ अथ सर्पसंस्कारविधिरुच्यते ॥ अथातः संप्रवक्ष्यामि सर्पसंस्कार मुत्तमं ॥ सिनीवाल्यां पौर्णमास्यां पंचम्यां कारयेद्बुधः ॥ अथ हतानां नागानां सर्पसंस्कारविधिं व्याख्यास्यामः ॥ इह जन्मनि जन्मांतरे वा मम कुले केनचित्पुरुषेण स्त्रिया वा सर्पवधे कृते सति सोन्यजन्मनि जन्मांतरे वा अनपत्यो मृतपुत्रो वा कुष्ठव्याधिर्वा भवति ॥ तद्दोषपरिहारार्थं सर्पसंस्कारं कुर्यात् ॥ दक्षिणायने उत्तरायणे वा कार्यः ॥ शुभे तिथौ सुनक्षत्रे सिनीवाल्यां पौर्णमास्यां कृष्णपंचम्यां शुक्लपंचम्यां नवम्यां एकादश्यां त्रयोदश्यां वा आश्लेषायुक्तदिवसे वा स्वानुकूलदिने वा कार्यः ॥ कार्तिक्यां माघमासे च चैत्रादि त्रयमासके ॥ श्रावण्यां कारयेत्तत्र तथा भाद्रपदेपि च ॥ एतेषु सप्तमासेषु मुख्यःकाल उदाहृतः ॥ मार्गशीर्षादिमासांते पंचम्यां कारयेद्बुधः ॥ अन्येष्वशुभमासेषु वर्जयेन्नक्रकर्कटौ ॥ गुरुभार्गवयोर्मौढ्ये द्वित्रिपादर्क्षवर्जिते ॥ तीर्थमहाक्षेत्रेषु गुरुशुक्रमौढ्यदोषो नास्ति ॥

स॰सं॰ कृष्णाष्टमीचतुर्दश्यां शुक्लपक्षे तु कारयेत् ॥ नदीष्वन्येषु तीर्थेषु तटाके शंकरालये ॥ अश्व वि॰
१ त्थदेवखाते च संगमे वा सरोवरे ॥ चंद्रताराबलोपेते कर्तव्यं च शुभेदिने ॥ अथ पूर्वेद्युरुप
वासं नक्तं वा कृत्वा ॥ परेद्युः स्वयं नद्यादौ संगमे वा प्रातःस्नानादिकं कृत्वा ॥ नित्यकर्म
कृत्वा गुरुणानुज्ञातः शुचौदेशे गोमयेनोपलिप्याप्रसृतिद्वयपरिमितेन प्रियंगुव्रीहिगोधूम
यवतिलमाषनीवारश्यामाकपिष्टं वा कृत्वा तत्पिष्टं गोमूत्रेण गोमयरसेन गोक्षीरेण गोद
ध्ना कुशोदकेन चार्द्रीकृत्वापंचफणान्वितं नागद्वयं कृत्वा तन्नागं नूतनशूर्पे पात्रे वा नि
धाय रक्तवाससाच्छाद्य संकल्पं कुर्यात् ॥ तद्यथा ॥ दर्भेष्वासीनो दर्भान्धारयमाणः आच
म्य प्राणानायम्य देशकालौ स्मृत्वा विशिष्टायां पुण्यशुभतिथौ ममकुले केनचित्पुरुषेण
स्त्रिया वा मयापराधेन कृतपूर्वहतनाशस्य तद्वधनिमित्तदोषपरिहारार्थं मम इह जन्मनि अ १
न्यजन्मनि जन्मांतरे वा कृतसर्पवधदोषपरिहारार्थं अपुत्रत्वमृतपुत्रत्वकुष्ठव्याधित्वादिनि

वृत्त्यर्थं सर्पशापमातृशापपितृशापविमोचनार्थं सर्पसंस्कारद्वारा शीघ्रमेव सुगुणानेकपुत्रप्रा
प्त्यर्थं संतत्याद्यंतरायभूतस्य प्रेतयोनीगतस्य अंधत्वमूकत्वबधिरत्वकुब्जत्व पंगुत्वपैशा
चत्वादिषड्विधानिवृत्त्यर्थं बुद्धिपूर्वकाबुद्धिपूर्वकहतदोषपरिहारार्थं प्रेतत्वाविमुक्त्या सर्पस्य
उत्तमलोकप्राप्त्यर्थं सर्पसंस्कारं करिष्य इति संकल्प्य कुरुष्वेति ब्राम्हणैरनुज्ञाप्य तदंग
गणपतिस्मरणं कृत्वा ब्रम्हदंडं निक्षिपेत् ॥ दर्भत्रयहिरण्यं च गृहीत्वा समग्रसंपदिति प्रद
क्षिणत्रयं कुर्यात् ॥ सर्वेभ्यो ब्राम्हणेभ्यो नमः ॥ अस्मत् पीडाकारिणो नागस्य संस्कार
योग्यतासिध्यर्थं सर्पस्योत्तमलोकप्राप्त्यर्थं मम अधिकारसंपदस्त्विति भवंतोब्रुवंतु ॥
तथास्त्वधिकारसंपदः ॥ यजमानः आचम्य प्राणानायम्य देशकालौ स्मृत्वा विशिष्टायां पु
ण्यतिथौ मम इहजन्मनि जन्मांतरे वा बाल्यकौमारयौवनवार्धिक्यावस्थासु मनोवाकाय
कर्मभिर्ज्ञानाज्ञानतश्च कृतसर्पवधदोषपरिहारार्थं सर्पस्य उत्तमलोकप्राप्त्यर्थं चतुर्दश

कृच्छ्रप्राय श्चित्तं करिष्य इति सर्पशरीरस्योपर्य्यक्षतोदकं निक्षिपेत् ॥ ॥ कृच्छ्रवि 
धानं तु उद्धारे द्रष्टव्यं ॥ चतुर्दशकृच्छ्रप्रत्याम्नायं यथाशक्तिहिरण्यं यथोक्तदक्षिणामिव
स्वीकृत्य मम सर्पसंस्काराधिकारसिद्धिरस्त्विति भवंत इत्यनुग्रहणे ॥ कृते सर्पवधे पूर्वं इह
जन्मनि जन्मनि ॥ स्नात्वागत्य ततो ब्रम्हदंडं दत्त्वा द्विजातये ॥ दद्यात्पापविशुद्ध्यर्थं श्रोत्रि
याय कुटुंबिने॥विप्राय दंडं मौल्यं वा ह्यभावे सति दापयेत्॥साक्षाद्वधस्य कर्ता च दंडं दद्यात्
द्विजातये ॥ निष्कत्रयं द्विनिष्कं वा निष्कमेकं प्रदापयेत् ॥ अनुमत्यादिकर्तॄणां निष्कमेकं
तदर्धकं ॥ वित्तशाठ्यं न कुर्वीत दद्याद्वित्तानुसारतः ॥ गुर्वनुज्ञां ततो लब्ध्वा संस्कुर्यात्तदनं
तरं ॥ आचार्यं वरयेत्पूर्वं सर्पसंस्कारकर्मणि ॥ इह जन्मनि सर्पवधे कृते सति धनुर्मात्रं लो
हदंडं कारयित्वा निष्कत्रयं द्विनिष्कं निष्कमेकं तदर्धं वा दक्षिणां गृहीत्वा अनेन मंत्रेण 
लोहदंडं दद्यात् ॥ मया सर्पवधं ब्रम्हन्नज्ञानेन कृतं त्वघं ॥ लोहदंडं प्रदास्यामि तद्दोषपरि

शांतये ॥ इति लोहदंडं दत्त्वा तत्रादौ पिष्टमयसर्पस्य पूजांगत्वेन प्राणप्रतिष्ठाद्युपचारपूजां
कुर्यात् ॥ तद्यथा ॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्यास्मत्पीडाकारिणो नागेंद्र
स्य पूर्वजन्मनि इहजन्मनि जन्मांतरे वा ज्ञानाज्ञानाच्च कृतदोषपरिहारार्थं अद्य सर्पसंस्का
रं कर्तुं मम मनोभीष्टसिद्ध्यर्थं पिष्टकृतसर्पस्य अनंताय काश्यपगोत्राय प्राणप्रतिष्ठाद्युप
चारपूजां करिष्ये ॥ नमो अस्तु सर्पेभ्यो इति सर्पावाहनं कृत्वा प्राणप्रतिष्ठां कुर्यात् ॥ अ
सुनीते पुनरस्मासुचक्षुः पुनः प्राणमिह नो धेहि भोगं ॥ ज्योक्पश्येम सूर्यमुच्चरंतमनुमते मृ
ळयानः स्वस्ति ॥ पुनर्नो असुं पृथिवीर्ददातु पुनर्द्यौर्देवी पुनरंतरिक्षं ॥ पुनर्नस्सोमस्तनुवं द
दातु पुनः पूषा पथ्यांय्या स्वस्ति ॥ शं रोदसीसुबंधवे यव्हीर्ऋतस्यमाता ॥ भरतामपयद्र
पो द्यौः पृथिवि क्षमारपो मोष ते किंचनाममत् ॥ इति मंत्रत्रयेण प्राणप्रतिष्ठापनं कुर्यात्
ॐभुजंगेशाय विद्महे सर्पराजाय धीमहि ॥ तन्नो नागः प्रचोदयात् ॥ इति सर्पगायत्र्या ना

०सं० गमभिमंत्र्य पंचगव्येन पंचामृतेन व्याहृतिभिः स्नापयित्वा आपोहिष्ठेति तिसृभिः हिर वि०
३ ण्यवर्णा इति चतसृभिः पवमानस्सुवर्जन इत्येतेनानुवाकेन मार्जयित्वा रक्तवस्त्रेणाच्छाद्य
यज्ञोपवीतं दत्वा क्षीरसर्पियुतजलेन गायत्र्या त्रिस्संप्रोक्ष्य ॥ अथध्यानं ॥ सर्परक्तं त्रिने
त्रं च द्विभुजं पीतवासकं ॥ फणानां पंचकं चैव सर्वाभरणभूषितं ॥ इति ध्यानं समर्पयामि॥
एहि पूर्वमितः सर्प अस्मिन् पिष्टे समाविश ॥ संस्कारार्थमहं भक्त्या प्रार्थयामि समाहितः॥
आवाहनं समर्पयामि ॥ नमोस्तु कालरूपाय सर्परूप नमोस्तु ते ॥ अर्घ्यं गृण्ह मया दत्त
मक्षय्यमुपतिष्ठतु ॥ अर्घ्यंस० ॥ नमोस्तु नागदेवाय सर्परूप नमोस्तु ते॥सर्वपापहरो देव पा
द्यं च प्रतिगृह्यतां ॥ पाद्यं समर्पयामि ॥ कालिको नाम सर्पो यो दृष्टिर्विष उच्यते ॥ त
स्य सर्पस्य सर्पत्वं तस्मै सर्प नमोस्तु ते ॥ आचमनीयंस०॥ अथ पुरुषसूक्तेनाभिषेकं कुर्या ३
त् ॥ सर्पगायत्रीमंत्रेण सर्पपूजां कुर्यात् ॥ वस्त्र यज्ञोपवीत गंध कुंकुमाक्षत पुष्प धूप दीप

गुग्गुल गुडनैवेद्य तांबूल दक्षिणानीराजनमंत्रपुष्पं कृत्वा ॥ नमो अस्तु सर्पेभ्य इति पुष्पां
जलिं दद्यात् ॥ नमो अस्तु सर्पेभ्यो येके च पृथिवीमनु ॥ ये अंतरिक्षे ये दिवि तेभ्यः सर्पे
भ्यो नमः ॥ ये दो रोचने दिवो ये वा सूर्यस्य रश्मिषु ॥ येषामप्सु सदः कृतं तेभ्यः सर्पेभ्यो
नमः ॥ याइषवो यातुधानानां येवा वनस्पतीꣳरनु॥ये वा वटेषु शेरते तेभ्यः सर्पेभ्यो नमः॥इ
ति पुष्पांजलिं दत्वा नागं सजीवं भावयित्वा सर्पगायत्र्या नागमभिमंत्र्य॥भुजंगेशाय विद्महे०
तन्नो नागः प्रचोदयात् ॥ इत्यभिमंत्र्य प्रार्थयेत् ॥ नमोस्तु नागदेवाय सर्परूप नमोस्तु ते॥
निर्विघ्नं कुरु मे देव त्वमेव शरणं मम ॥ ज्ञानतोऽज्ञानतो वाऽपि कृतस्सर्पवधो मया ॥ पूर्वज
न्मनि वा सर्प तत्सर्वं क्षमयस्व मे ॥ अनेन मंत्रेण प्रार्थनानमस्कारं कृत्वा ॥ ततोष्टौ प्राणा
यामान् कुर्यात् ॥ तत्रैकं सर्पं मृतं भावयित्वा ॥ अथ शुचौ देशे स्थंडिलोल्लेखनादिलौकि
काग्निं प्रतिष्ठाप्य प्राणानायम्य देशकालौ स्मृत्वाऽस्मत्पीडाकारिणो नागेंद्रस्य जन्मांत

स०सं० रे इह जन्मनि यद्यपराधेन सर्पवधं कृतं नागस्य काश्यपगोत्रस्य उत्तमलोकप्राप्त्यर्थं मम वि०
४ नागपीडापरिहारार्थं और्ध्वदेहिकविधिना सर्पसंस्कारहोमं करिष्ये ॥ सर्पसंस्कारहोमः क
र्म और्ध्वदेहिकं तंत्रं ॥ चतस्त्रः सामिधेन्यः ॥ अग्नीषोमावाज्यभागौ पिष्टमयसर्पशरीरꣳह
विः ॥ जातवेदो नामाग्निः सर्पानंतकपिलशेषनागकालिंगशंखपालभूधरा इति प्रधानदेव
ताश्चतस्त्र आज्याहुतयः ॥ नमो अस्तु सर्पेभ्य इति तृचेनाज्येनाष्टावष्टौ अग्निः स्विष्टकृदा
ज्यस्य मांत्रवर्णिक्यो देवता अंगदेवताः प्रधानदेवतास्तास्सर्वाः सन्निहितास्संतु एवं सांगे
न कर्मणा सद्यो यक्ष्ये ॥ तदंगमन्वाधानं करिष्ये ॥ व्याहृतिभिस्तिस्त्रः समिध आधाय जुष्टो
दमूना इत्यादिस्त्रुवमार्जनांतं समिधाधानांतं कृत्वा स्त्रुचिचतुर्गृहीतं गृहीत्वा ॥ पक्कं जुहोति॥
ॐइदꣳ सर्पेभ्यो हविरस्तु जुष्टं ॥ आश्लेषायेषामनुयंति चेतः ॥ ये अंतरिक्षं पृथिवीं क्षियं ४
ति ॥ ते नः सर्पासो हवमागमिष्ठाः इति पुरोनुवाक्यामनूच्य ॥ ये रोचने सूर्यस्यापि सर्पाः॥

ये दिवं देवीमनु संचरंति॥येषामाश्लेषा अनुयंति कामं ॥ तेभ्यः सर्पेभ्यो मधुमज्जुहोमि स्वा
हा ॥ सर्पायेदं ॥ यज्ञोपवीतिना कार्यं सर्पसंस्कारकर्मसु ॥ स्त्रुवेणाज्यमादाय ॥ परेयुवाꣳ
संप्रवतो महीरनु बहुभ्यः पंथा मनुपस्पशानं ॥ वैवस्वतꣳ संगमनं जनानां यमꣳ राजान
ꣳ हविषा दुवस्यत स्वाहा ॥ यमायराज्ञ इदं ॥ अत्र न पूर्णाहुतिं न पूर्णपात्रं ॥ न प्राची
नावीतित्वं ॥अथ अग्नेराग्नेयदिग्भागे भुजंगगायत्र्या भूमिं प्रोक्ष्य भूमिप्रार्थनं करिष्ये ॥ उ
पसर्पमातरं भूमिमेतामुरुव्यचसंपृथिवीꣳ सुशेवां ॥ ऊर्णं म्रदायुवतिर्दक्षिणावत्येषा त्वा पा
तु निर्ऋत्या उपस्थे ॥ इति भूमिप्रार्थनं ॥ मृत्योः पदं यो पयंतो यदेमद्राघीय आयुः प्रत
रां दधानाः ॥ आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवथ यज्ञियासः ॥ इति पंचगव्ये
न संप्रोक्ष्य तत्र चितिं कृत्वा प्रागग्रान् दर्भानास्तीर्य यज्ञकाष्ठानि निधाय प्रागुदगग्रैर्दर्भैः
परिस्तीर्य तूष्णीं परिषिच्य आज्यभागांते चतुर्गृहीतमाज्येन व्याहृतिभिर्हुत्वा ॐभूः स्वा

स०सं० हा ॥ अग्नय इदं० ॥ भुवः स्वाहा वायव इदं० ॥ सुवःस्वाहा सूर्यायेदं० ॥ भूर्भुवः सुवः स्वाहा वि०
५ प्रजापतय इदं० ॥ इति हुत्वा ॥ चितौ नागं प्रतिष्ठाप्य ॥ मैनमग्ने यदेति द्वाभ्यां मंत्राभ्या
मग्निं दत्वा ॥ मैनमग्ने विदहोमाभिशोचो मास्यत्वचं चिक्षिपो माशरीरं ॥ यदाशृतं करवो
जातवेदोथेमेनं प्रहिणुतात्पितृभ्यः ॥ शृतं यदाकरसि जातवेदो थेमेनं परिदत्तात्पितृभ्यः ॥
यदा गच्छात्यसनीतिमेतामथो देवानां वशनीर्भवाति ॥ इत्यग्निं दत्वा ॥ अथाज्याहुतिः ॥
ॐनमो अस्तु०॥नमः स्वाहा ॥ सर्पेभ्य इदं०॥ ॐयेदोरोचने०॥नमः स्वाहा॥सर्पेभ्य इदं०॥
ॐया इषवो० ॥ नमः स्वाहा॥सर्पेभ्य इदं० ॥ इति तिसृभिर्हुत्वा ॥ य एतस्य पथो इति न
वाज्याहुतीर्जुहोति॥य एतस्य पथो गोप्तारस्तेभ्य स्वाहा॥गोप्तृभ्य इदं०॥ य एतस्य पथो
रक्षितारस्तेभ्यः स्वाहा ॥ रक्षितृभ्य इदं० ॥ य एतस्य पथोभिरक्षितारस्तेभ्यः स्वाहा ॥ ५
अभिरक्षितृभ्य इदं० ॥ आख्यात्रे स्वाहा ॥ आख्यात्र इदं०॥ अपाख्यात्रे स्वाहा ॥ अपा

ख्यात्र इदं० ॥ अभिलालपते स्वाहा ॥ अभिलालपत इदं० ॥ अपलालपते स्वाहा ॥ अप
लालपत इदं० ॥ अग्नये कर्मकृते स्वाहा अग्नये कर्मकृत इदं० ॥ यमत्रनाधीमस्तस्मै स्वाहा
अग्नय इदं० ॥ सर्पाय स्वाहा ॥ सर्पायेदं० ॥ अनंताय स्वाहा ॥ अनंतायेदं० ॥ शेषाय
स्वाहा ॥ शेषायेदं० ॥ कपिलाय स्वाहा ॥ कपिलायेदं० ॥ नागाय स्वाहा ॥ नागायेदं ॥
कालिंगाय स्वाहा ॥ कालिंगायेदं० ॥ शंखपालाय स्वाहा॥ शंखपालायेदं० ॥ भूधराय
स्वाहा ॥ भूधरायेदं० ॥ इत्येतैर्नाममंत्रैर्जुहुयात् ॥ आयंगौरितिमंत्रेण सर्पं चितौ समारोप्य
आयंगौः पृश्निरक्रमीदसनन्मातरं पुनः ॥ पितरं च प्रयन्त्सुवः ॥ अथ शेषसक्तून् अपूपत्रयं
कृत्वा ॥ अपूपमेकं गृहीत्वा नमो अस्तुसर्पेभ्य इति मंत्रेण मुखोपरि अपूपं दद्यात् ॥ येदो
रोचन इतिमंत्रेण द्वितियमपूपं दक्षिणबाहुप्रदेशे दद्यात् ॥ या इषव इति मंत्रेण तृतीयमपूपं
वामबाहुदेशे दद्यात् ॥ गायत्र्या ॥ अनंताय काश्यपगोत्राय अयं ते अग्निमुपतिष्ठतु ॥ इत्य

स०सं० ग्निं दत्वा ॥ तिसृभिर्व्याहृतिभिः सर्पायाज्याहुतिं जुहुयात् ॥ ॐभूः स्वाहा ॥ अग्नय इदं० वि०
६ ॐभुवस्वाहा ॥ वायव इदं० ॥ ॐसुवःस्वाहा ॥ सूर्यायेदं० ॥ आज्यशेषेणैव सर्पदेहमभिषे
चयेत् ॥ ततो अन्येनाज्येन सर्पेभ्यः स्वाहा ॥ सर्पेभ्य इदं० ॥ आश्लेषाभ्यः स्वाहा ॥ आ
श्लेषाभ्य इदं० ॥ ॐदंदशूकेभ्यः स्वाहा ॥ ॐदंदशूकेभ्य इदं० ॥ इति सर्पशरीरस्योप
रि जुहुयात् ॥ मैनमग्ने विदहोमाभिशोचो मास्यत्वचं चिक्षिपो माशरीरं ॥ यदाशृतंकरवो
जातवेदोथेमेनं प्रहिणुतात्पितृभ्यःस्वाहा ॥ अग्नय इदं० ॥ श्रुतं यदा करसि जातवेदोथेमेनं
परिदत्तात्पितृभ्यः ॥ यदा गच्छात्यसुनीतिमेतामथो देवानां वशिनीर्भवातिः स्वाहा ॥ जात
वेदसइदं० ॥ इति द्वाभ्यां हुत्वा सर्पगायत्र्या आज्यशेषेण जुहुयात् ॥ भुजंगेशाय विद्महे
प्रचोदयात्स्वाहा ॥ सर्पेभ्य इदं ॥ ततः चितौ स्रुवं निधाय यज्ञपात्राणि निक्षिप्य ॥ अग्निं ६
प्रज्वाल्य स्वप्नस्वप्नाधिकरणेतिप्रदक्षिणीकृत्य ॥ यशस्करं बलवंतं० ॥ दीर्घमायुः ॥ कर्कोट

को नाम सर्पो यो दृष्टीर्विष उच्यते ॥ तस्मै सर्पस्य सर्पत्वं तस्मै सर्प नमोस्तु ते ॥ इति प्र
दक्षिणीकृत्य नमो अस्तु सर्पेभ्य इति तिसृभिर्नमस्कृत्य आघारपक्षे प्रणीतापात्रस्थजलैः
र्व्याहृत्या सर्पमभिषिच्य ॥ कर्कोटको नाम सर्पो यो दृष्टीर्विष उच्यते ॥ तस्मै सर्पस्य
सर्पत्वं तस्मै सर्प नमोस्तु ते ॥ नर्मदायैनमः प्रातर्नर्मदायै नमो निशि ॥ नमोस्तु नर्मदे तुभ्यं
त्राहि मां विषसर्पतः ॥ जरत्कारो जरत्कार्यां समुत्पन्नो महायशाः ॥ आस्तीकस्सत्यसंधो
मां पन्नगेभ्योभिरक्षतु ॥ सर्पापसर्पभंद्रं ते दूरं गच्छ महाविष ॥ शतधा भिद्यते मूर्द्धा शिशु मूर्द्धा
वृक्षफलं यथा ॥ ज्ञानतोज्ञानतोवापि कृतस्सर्प वधो मया ॥ इह जन्मनि पूर्वे वा तत्सर्वं क्ष
मयस्व मे ॥ इति प्रार्थ्य ॥ ततोदकुंभं गृहीत्वा त्रिः प्रदक्षणं कुर्यात् ॥ सर्पपाददेशे स्फोट
यित्वा ॥ ततो दहने जाते घृतमिश्रदुग्धं सर्पदेहे निषिच्य क्षीराज्येन ततश्चाग्निं संप्रोक्ष्य
र्व्याहृतिभिस्तिसृभिः सर्पदेहं विना दग्धं अभिषिच्य ततः परं ॥ सर्पाय चोदकं दत्वा ॥

स्नानं कुर्यात् ॥ मृन्मयपात्रे पंचगव्येन संस्नाप्य ॥ अश्वत्थशाखया प्रोक्ष्य ॥ दहनस्थाने ॥ समीचीनामासिप्राचीदिक्० ॥ अग्निरधिपति० ॥ तं वो जंभे दधामि ॥ ओजस्विनीनामासि दक्षिणादिक् ॥ इंद्रोधिपतिः पृदाकूरक्षिता० मि ॥ प्राचीनामासि प्रतीची दिक्० सोमोधिपतिः स्वजोरक्षिता० मि ॥ अवस्थावानोनामास्युदीचीदिक्०वरुणोधिपतिस्तिरश्चिराजीरक्षिता० मि ॥अधिपत्नीनामासि बृहतीदिक्० बृहस्पतिरधिपतिश्चित्रोरक्षिता० मि ॥ वशिनीनामासी यंदिक्० यमोधिपतिः कल्माषग्रीवो रक्षिता० तं वां जंभे दधामि ॥ हेतयो नामस्थतेषां वः पुरोग्रहा अग्निर्व इषवस्सलिलोवातनामं० तं वो जंभे दधामि ॥ निलिंपानामस्थतेषां वो दक्षिणा ग्रहाः पितरो व इषवः सगरो वातनामंते० तं वो जंभे दधामि ॥ वज्रिणो नामस्थ तेषां वः पश्चाद्गृहाः स्वप्नो व इषवो गव्हरो वातनामं० मि ॥ अवस्थावानो नामस्थ तेषां व उत्तराद्गृहा आपो व इषवस्समुद्रो वातनामं० मि ॥ अधि



पतयो नामस्थ तेषां व उपरि ग्रहा वर्षं व इषवो वस्वान्वातनामं०मि ॥ क्रव्या नामस्थ पार्थिवास्तेषां व इह ग्रहा अन्नं व इषवो निमिषो वातनामं० तं वो जंभे दधामि ॥ इति षड्भिः पर्यायैः संप्रोक्ष्य ॥ सर्वं दहनभस्म गंगाजले निक्षिपेत् ॥ नास्ति संचयनं तत्र सर्पसंस्कारकर्मसु ॥ गोदुग्धगोमूत्रेण प्रोक्षणं कृत्वा दहनस्थले वेदिकां कुर्यात् ॥ तस्योपरि मृन्मयनागत्रयं कृत्वा नागपूजां कुर्यात् ॥ पूर्वोच्चरित० विशिष्टायां शुभतिथौ मम इह जन्मनि जन्मांतरे वा सर्पबंधसर्पसिंह वधदोषपरिहारार्थं श्रीनागेशप्रीत्यर्थं नागपूजां करिष्ये ॥ अनंतः सर्वनागानां इदमासनं ॥ पाद्यादिसर्वपूजां कृत्वा तदंगपिंडदानं करिष्ये ॥ भूमौ दर्भान्निक्षिप्य ॥ दर्भोपरि पिंडदानं कुर्यात् ॥ अनंताय अयं पिंडः स्वधा नमः ॥ शेषाय अयं पिंडः० कपिलाय अयं पिंड इति पिंडत्रयं दत्वा उपरि तिलोदकं दद्यात् ॥ ततो यजमानः ॥ इह जन्मनि जन्मांतरे वा सर्पवधजनितदोषपरिहारार्थं नारायणपूजां करिष्ये ॥ वि

स०सं० मलाय नम इत्यादिद्वादशनामांतं कृत्वा कदलीफलचणकनारिकेलफलैर्नैवेद्यतांबूलदक्षि वि०
८ णामंत्रपुष्पं कृत्वा ॥ पादुका छत्रोदकुंभं च दद्यात् ॥ ज्ञानतोऽज्ञानतो वापि कृतस्सर्पवधो मया ॥ पूर्वजन्मनिवा सर्प तत्सर्वं क्षमयस्व मे ॥ इति प्रार्थ्य ॥ अष्टौ प्राणायामान्कृत्वा समापयेत् ॥ तदितरं आच्छादितसर्पं गृहीत्वा वल्मीकसमीपं गत्वा तद्वल्मीकं गंधादिनाभ्यर्च्य क्षीरसर्पिर्जलैर्वल्मीकं पूरयित्वा तत्र वल्मीके नागं संस्थाप्य क्षीरं पूरयित्वा नागगायत्र्या नमो अस्तु सर्पेभ्य इत्यादिऋग्भिस्तत्पुरतो बलिं दत्वा अक्षतादिभिरभ्यर्च्य नमस्कृत्य क्षमां पालयेत् ॥ पुनः स्नात्वा गंगातटाकेषु दर्भमयनागं कृत्वा स्थापयित्वा संकल्प्य ॥ पुण्यतिथौ मम इह जन्मनि जन्मांतरे वा कृतसर्पवधनिमित्तजनितदोषपरिहारार्थं नागेशप्रीत्यर्थमष्टोत्तरशतमृत्तिकास्नानं करिष्ये ॥ कारयित्वा वा ॥ ततःतिलांजलिं दत्वा ॥ आ ८
चांते पिंडदानं करिष्ये ॥ अपसव्यं कृत्वा काश्यपगोत्रस्य नागेंद्रशर्मणः इमं तिलांजलिमु

पतिष्ठतु ॥ यथासंख्या कार्यं ॥ चरुमध्ये गुडाज्यक्षीराणि निक्षिप्य ॥ द्वादश पिंडान्कृत्वा ॥ दर्भानास्तीर्य ॥ काश्यपगोत्राय अनंताय अयं पिंड उपतिष्ठतु ॥ वासुकिने अयं ॥ शंखपालाय अयं ॥ पद्मकाय अयं ॥ कपिलाय अयं ॥ कर्कोटकाय अयं ॥ अश्वशरीराय अयं ॥ धृतराष्ट्राय अयं ॥ शंखाय अयं ॥ कलिंगाय अयं ॥ तक्षकाय अयं ॥ कपिलाय काश्यपगोत्राय अयं पिंड उपतिष्ठतु ॥ अनेन द्वादशपिंडान् दद्यात् ॥ पिंडस्योपरि गंधपुष्पाक्षतवस्त्राद्युपचारपूजां कुर्यात् ॥ नमोस्तु सर्परूपाय कालरूप नमोस्तु ते ॥ निर्विघ्नं कुरु मे देव त्वमेवशरणं मम ॥ अनेन प्रार्थनानमस्कारान् कृत्वा ॥ अथ चरुशेषेण बलिं दद्यात् ॥ यः कश्चिन्मे कुले नागा हता मंदेन केनचित् ॥ प्रेतभूता मया दत्तं बलिं गृण्हंतु तृप्तये ॥ अनेन बलिदानेन देवलोकंच गच्छतु ॥ ततः पिंडानुद्वास्य जले क्षिप्त्वा ॥ ततः स्नात्वा शुक्लवस्त्रपरिधानं कृत्वा माषद्वयमेकं वा यथाशक्तिनिर्मितां सुवर्णनागप्रतिमां कृत्वा पुनः संक

स॰सं॰ ल्प्य ॥ एवं गुणविशेषणविशिष्टायां शुभतिथौ मम इह जन्मनि अन्यजन्मनि जन्मांतरे वा वि॰
१ कृतसर्पवधदोषपरिहारार्थं नागेशप्रीत्यर्थं नागपूजां करिष्ये ॥ सर्पं रक्तं त्रिनेत्रं च द्विभुजं पीतवाससं ॥ फणापंचधरं सूक्ष्मं सर्वाभरणभूषितं ॥ ध्यानं ॥ एहि पूर्व हतस्सर्प अस्मिन् रूपे समाविश ॥ आवाहनं करिष्यामि सर्परूप नमोस्तु ते ॥ आवाहनं ॥ नमोस्तु कालरूपाय सर्परूप नमोस्तु ते ॥ सर्वपापहरो देव आसनं प्रतिगृह्यतां ॥ आसनं ॥ नमोस्तु नागरूपाय सर्परूप नमोस्तु ते ॥ सर्वपापहरो देव पाद्यं च प्रतिगृह्यतां ॥ पाद्यं ॥ नागाय नागरूपाय सर्परूप नमोस्तु ते ॥ अर्घ्यं गृण्ह मया दत्तमक्षय्यमुपतिष्ठतु ॥ अर्घ्यं ॥ कालिको नाम सर्पो॰ नमोस्तु ते ॥ आचमनीयं ॥ पंचामृतमंत्रेण पंचामृतस्नानं कुर्यात् ॥ वस्त्रोपवीतगंधकुंकुमाक्षतपुष्पाणि कुर्यात् ॥ नाममंत्रेण ॥ अनंताय पुष्पं धूपं दीपं क्षीराज्यगुड १
नैवेद्यतांबूलं सुवर्णपुष्पंनीराजनं मंत्रपुष्पं प्रदक्षिणा नमस्कारान्कृत्वा ॥ ॥ अथ स्थं

डिलमुपलिप्य लौकिकाग्निं प्रतिष्ठाप्य संकल्प्य शुभतिथौ मम मनोभीष्टसिद्ध्यर्थं नागहोमं करिष्ये ॥ नागहोमः कर्मआघारपूर्वकं तंत्रं ॥ चरुर्हविः ॥ सर्पानंतशेषकपिलनागकलिंगशंखपालपद्मकभूधरा इतिप्रधानदेवताः ॥ क्षीराज्यमिश्रद्रव्येण कालिकोनाम सर्प इति मंत्रेण कालिकं तिलाज्यद्रव्येण अष्टोत्तरशतसंख्यया यक्ष्ये ॥ इत्यन्वाधानादिप्रधानहोमांतं कृत्वा स्विष्टकृदादिहोमशेषं समापयेत् ॥ ज्ञानतोऽज्ञानतो वापि कृतः सर्पवधोमया ॥ निर्विघ्नं कुरु मे देव त्वमेव शरणं मम ॥ नमोस्तु कालरूपाय सर्परूप नमोस्तु ते ॥ अपमृत्युहरो देव त्राहि मां शरणागतं ॥ इतिप्रार्थनानमस्कारांतं कृत्वा ततो नागप्रीतये गोदानं कुर्यात् ॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश ॥ तस्मादस्याः प्रदानेन अतः शांतिं प्रयच्छ मे ॥ इति गोदानं ॥ अथ माषदानं ॥ यस्मान्मधुवने काले विष्णोर्देहसमुद्भवाः ॥ पितृप्रीतिकरा माषाअतःशांतिं प्रयच्छ मे ॥ अथ क्षीरदानं ॥ क्षीरं मंगलमायुष्यं

 बलसौभाग्यवर्धनं ॥ अलक्ष्मीहरणं नित्यमतः शांतिंप्रयच्छमे ॥ अथ आज्यदानं ॥ कामधे
नुसमुद्भूतं सर्वक्रतुषु संस्थितं ॥ देवानामाज्यमाहारमतः शांतिं प्रयच्छ मे॥अथ तंडुलदानं॥
तंडुला वैश्वदैवत्या पाकेनान्नं भविष्यति ॥ तस्मादस्य प्रदानेन अतः शांतिं प्रयच्छ मे ॥
इति दत्वा सुवर्णनागप्रतिमां त्रिदिनं ब्राम्हणमुखेन पूजयेत् ॥ इति प्रथमदिनकृत्यं ॥ द्विती
यदिवसे ब्राम्हणभोजनं ॥ तृतीयदिवसे सचैलस्नानं ॥ सर्पदहनदिनादारभ्य त्रिरात्रं
ब्रम्हचर्यं कार्यं ॥ अथचतुर्थेऽहनि प्रातः स्नात्वा पुण्याहवाचनं पंचगव्यप्राशनं यज्ञोपवीतं
च धृत्वा ॥ अन्नेन घृतपायसैर्भक्ष्यैरष्टौ ब्राम्हणान् वक्ष्यमाणमंत्रैरर्चयित्वा भोजयेत् ॥ संकल्पं
कृत्वा ममइह जन्मनि अन्यजन्मनि जन्मांतरे वा कृतसर्पवधदोषपरिहारार्थं श्रीनागेशप्री
त्यर्थंब्राम्हणसमाराधनं करिष्ये ॥ सर्पमावाहयामि ॥ अनंतं शेषं कपिलं नागं कालिकं 
शंखपालं भूधरं एभिर्मंत्रैः पाद्यार्घ्याचमनगंधाद्युपचारान्कृत्वा अथ तेभ्यो वाससीयज्ञो

पवीतं पात्रं फलंदक्षिणां छत्रं पादुके च दत्वा आचार्याय सालंकारां सवत्सांपयस्विनीं गां
अन्येभ्यो भूमिं उदकुंभं तिलपात्रं च दत्वा भोजनांते ब्राम्हणाशीर्वादंगृहीत्वा शांतिरस्त्विव
ति पठित्वा पुण्याहवाचनं च कृत्वा नमो महद्भ्य इति नमस्कृत्य ॥ स्वप्नः स्वप्नाधिकरणे इति
ऋचं पठित्वाप्रार्थयेत् ॥ ब्रम्हलोकेच ये सर्पाः शेषनागपुरोगमाः ॥ नमोस्तु तेभ्यः सुप्रीताः
प्रसन्नाः संतु मे सदा ॥ १ ॥ विष्णुलोके च ये सर्पावासुकीप्रमुखास्तथा ॥ नमोस्तु तेभ्यः
सुप्रीताः प्रसन्नाः संतु सर्वदा ॥ २ ॥ रुद्रलोके तु येसर्पास्तक्षकप्रमुखास्तथा ॥ नमोस्तु
तेभ्यः सुप्रीताः प्रसन्नाः संतु सर्वदा ॥ ३ ॥ कापिलेयाश्च ये सर्पा मातृभक्तिपरायणाः ॥
नमोस्तु तेभ्यः ॥ ४ ॥ पांडवस्य च दाहेनस्वर्गे लोके समागताः ॥ नमोस्तु तेभ्यः० ॥ ५ ॥
सर्पसत्रे च ये सर्पा आस्तिकेन चरक्षिताः ॥ नमोस्तु तेभ्यः० ॥ ६ ॥ यमलोके च ये सर्पा
वैतरण्यां समागताः ॥ नमोस्तु तेभ्यः० ॥ ७ ॥ समुद्रे चैव ये सर्पा ये सर्पा जलवासिनः ॥

स०सं० नमोस्तु तेभ्यः० ॥ ८ ॥ मलये चैव ये सर्पाः कर्कोटप्रमुखाश्च ये ॥ नमोस्तु तेभ्यः० ॥ वि०
११ ॥ ९ ॥ ये सर्पाः पर्वताग्रेच ये च संधिषु संस्थिताः ॥ नमोस्तु तेभ्यः० ॥ १० ॥ पृथिव्यां
चैव ये सर्पा ये सर्पाबिलवासिनः ॥ नमोस्तु तेभ्यः० ॥ ११ ॥ ग्रामे वा यदि वा राष्ट्रे ये
सर्पाः प्रचरंति हि ॥ नमोस्तु तेभ्यः० ॥ १२ ॥ रसातले च ये सर्पा अनंताद्या महाव्रताः ॥
नमोस्तु तेभ्यःसुप्रीताः प्रसन्नाः संतु सर्वदा ॥ १३ ॥ एवं स्तुत्वा सुवर्णनागप्रतिमामाचा
र्याय दद्यात् ॥ ब्राम्हणैरनुज्ञातः स्वयं इष्टैः सह भुंजीयात् ॥ एवंकृते सर्पसंस्कारविधिना तस्य
सर्पवधजनितदोषशांतिर्भवति ॥ सर्पशापान्मुक्तो भवति ॥ अनपत्यश्च मृतपुत्रश्च सुपुत्रवा
न् दीर्घायुष्मान् भवति ॥ सर्वथाभेषजं त्विदं ॥ आयुरारोग्यमैश्वर्यं सर्वान्कामानवाप्नुया
त् ॥ इत्याह भगवान्बोधायनः शौनकश्च ॥ इति सर्पसंस्कारप्रयोगःसमाप्तः ॥ अथ नागप्र ११
तिष्ठाविधिरुच्यते ॥ अथ नागप्रतिष्ठां तु वक्ष्ये संक्षेपतस्तथा ॥ सा चोदगयने शुक्लपक्षे ना

स०सं० च ॥ कृत्वैव नित्यकर्माणि नत्वा विप्रान्गृहं व्रजेत् ॥ पंचामृतेन संस्नाप्य नागमंत्रेण पूज वि०
१२ येत् ॥ वस्त्राभ्यां यज्ञसूत्रेण गंधपुष्पाक्षतैर्यजेत् ॥ कुर्याद्वादित्रघोषैश्च पुण्यस्त्रीभिर्द्विजैः सह ॥
नागं गृहीत्वा यत्नेन व्रजेदश्वत्थसंनिधिं ॥ शिवालयं देवगृहं विष्णोरायतनं तु वा ॥ प्रक्षा
ल्यपादावाचम्य कर्ता पुण्याहपूर्वकं ॥ नांदीश्राद्धं प्रकुर्वीतपश्चात्स्थापनमाचरेत् ॥ अनेन
स्थापनं होममाचार्येणैव कारयेत् ॥ स्थापनादुत्तरं सम्यग्घोमंकुर्याद्विजोत्तमः ॥ कृत्वाज्य
भागपर्यंतं स्वगृह्योक्तविधानतः ॥ शांतिकुंभं प्रतिष्ठाप्य अग्नेरीशानदेशके ॥ पालाशैश्च स
मिद्भिश्च चरुणा सर्पिषा तथा ॥ अष्टाविंशतिमष्टौ वा जुहुयाच्च पृथक् पृथक् ॥ मंत्रैर्नमोस्तु
सर्पेभ्य इत्याद्यैस्तिसृभिः क्रमात् ॥ व्याहृत्या तिलहोमं च कृत्वा स्विष्टकृदादिकं ॥ ततोनंतं
च संस्नाप्य सुवर्णेन शलाकया ॥ कुशपुष्पैश्च संगृह्य दक्षिणेनाभिमर्शयेत् ॥ ॐ भूर्भुवस्सुवः १२
पूर्वगायत्र्या ध्रुवतस्तकः ॥ नमो अस्त्विति मंत्रेण ध्यात्वा संस्थापयेत्त्वहिं ॥ दीर्घं रक्तत्रिनेत्रं

गतिथिर्यथा ॥ तथा संस्थापनं कुर्यान्नहन्येवं सुलग्नके ॥ जलाधिवासनं कार्यं कर्ता पूर्वदि
ने हनि ॥ दंतानां धावनं कार्यं तिलस्नानं विधीयते ॥ उपवासं च संकल्प्य कर्ता तत्र
जितेंद्रियः ॥ आचार्यं वरयेत्पश्चाद्ब्राम्हणं वेद पारगं ॥ सदाचाररतं शांतं कुलीनं च कुटुंबि
नं ॥ तेनैव कारयेत्पूजां पूर्वरात्रमतंद्रितः ॥ ततश्चास्तमयादूर्ध्वमनंतं सन्निधापयेत् ॥ अलं
कृते शुचौदेशे शुक्लवस्त्रोपरि न्यसेत् ॥ प्रक्षाल्य पादावाचम्य उपविश्यासने शुभे ॥ पूजासं
कल्पनं कुर्यात्प्राणायामपुरस्सरं ॥ पंचगव्येन संस्नाप्य तत्तन्मंत्रैः क्रमेण तु ॥ गंधपुष्पफ
लैर्युक्तकुशतीर्थोदकेन च ॥ यज्ञोपवीतगंधाद्यैः पंचभिश्चोपचारकैः ॥ नागं समर्चयेद्भक्त्या
गायत्र्या प्रणवेन च ॥ गंधपुष्पाक्षतैर्धूपदीपैर्नागं समर्चयेत् ॥ प्रियंगुतिलपिष्टेन मोदकैश्च
फलेन च ॥ घृतक्षीरेण नैवेद्यतांबूलादीन्प्रकल्पयेत् ॥ दंडप्रणामनं कुर्यादष्टांगैरष्टसंख्यया ॥
दीपैरसंख्यैस्तत्रैव नीत्वा रात्रिं समाहितः ॥ आचार्यः प्रतरुत्थाया कृत्वा संध्यादि कर्म

च द्विभुजं पीतवाससं ॥ फलकं सिद्धिदं सूक्ष्मं सर्वाभरणभूषितं ॥ पंचोपचारैरभ्यर्च्य गंधपु
ष्पाक्षतैः क्रमात् ॥ पूरिकापायसापूपैर्नैवेद्यैर्विविधैःशुभैः ॥ नानासुसौरभैः पुष्पैस्तांबूलैश्च
समर्चयेत् ॥ धेनुं पयस्विनीं दत्वा दक्षिणार्थं प्रयत्नतः ॥ धेन्वाभावे हिरण्यानि दद्याद्वित्ता
नुसारतः ॥ ब्राम्हणान्भोजयेत्पश्चात् भुंजीयाद्बंधुभिः सह ॥ अनेनविधिना यस्तुकरोति
स्थापनं महत् ॥ नागेंद्रस्य प्रसादेन सर्वान्कामानवाप्नुयात् ॥ इति शौनकीयनागप्रतिष्ठा
विधिः ॥ ॥ अथ मूढगर्भशांतिरुच्यते ॥ नारदोहं प्रवक्ष्यामि प्रयोगपरिबृंहितं ॥ गर्भात्तु
पंचमे मासि सप्तमे मासि एववा ॥ जननाद्द्वादशाहे च प्रायश्चित्तं च कारयेत् ॥ अथवा शुभे
न्हि शुभवारे च शुभर्क्षे च शुभे दिने ॥ अथप्रयोगः ॥ अथ पूर्वाण्हे दंपती सचैलस्नानं कृ
त्वा तिष्ठेतां ॥ आचार्य उभयोर्योन्योः कृष्णाजिनेन विष्णुर्योन्यादिमंत्रेण ताडनं कृत्वा गो
मूत्रेण स्नापयेत् ॥ विष्णुसूक्तगिरिजासूक्तकूष्मांडैः शारीरसूक्तैः शतवारं स्नाप्यानंतरं दं

ती मृत्तिकास्नानं कृत्वाथपंचगव्येन वरुणसूक्तेन प्रोक्षयेत् ॥ गोमूत्रगोमयक्षीरदधि
पिंकुशोदकैः ॥ मेलनं कृत्वा प्राशयेत् ॥ यत्वगस्थिगतं पापं देहे तिष्ठति मामके ॥ प्राशनं
पंचगव्यस्य दहत्यग्निरिवेंधनं ॥ पंचगव्यप्राशनं कृत्वालंकृतं गृहंगत्वा प्रायश्चित्तं कुर्यात् ॥
आदौ गोपूजा ॥ मलपिंडसमूहं च अग्निना शुद्धिपूर्वकं ॥ गोगर्भजातः शुद्धिः स्यात्पश्चा
द्गोत्रं प्रकल्पयेत् ॥ गावश्च प्रार्थितास्ताभ्यां सवत्साधारणक्षमाः ॥ प्रार्थना ॥ सर्वलक्षणसं
पन्ने पयःशीलगुणान्विते ॥ मया पुत्रः कृतो यस्मातव गर्भे सुधारय ॥ उपेदमुपपर्चनामिति
मंत्रेण गर्भस्थं भावयेत् ॥ ब्राम्हणेभ्यो प्राजापत्यकृच्छ्रचतुष्टयं दद्यात् ॥ तत्प्रतिनिधिं वा ॥
कृच्छ्रैकस्यैका गौः ॥ अशक्तौ निष्कं तदर्धं पादं वा ॥ पादहीनं न कारयेत् ॥ इति वचनाच्च ॥
मया मम पत्न्या च ऋतुशांतेरर्वाकृतगर्भजन्यदोषपरिहारार्थं चतुष्टयप्राजापत्यकृच्छ्रप्र १३
त्याम्नायद्रव्यंतेभ्यस्तेभ्यः संप्रददे नम इति कृच्छ्राचरणं ॥ अथ दंपती वस्त्रालंकारं यथावि

भवं धृत्वा पौरंध्रीभिःमंगलतूर्यघोषैश्च सभां गत्वा गुर्वादिभ्य आशीर्गृहीत्वा नित्यकर्मकृत्वा
वैश्वदेवं हुत्वा द्विराचमनप्राणायामौ कृत्वा स्नानपवनादिचरित्वा मूढगर्भशांतिकर्मण
पुण्याहं स्वति ऋद्धिमिति वाचयित्वा नांदीमुखं कुर्यात् ॥ पुण्याहे विशेषः ॥ विष्णुः प्रीयता
मिति ॥ ऋत्विजो वरयित्वा ॥ विष्णुरुद्रलक्ष्मीं प्रतिमासह कलशत्रयं प्रतिष्ठाप्य कलश
समीपे चतुःषष्टिपलसुवर्णपरितंशिशुं स्थाप्य तत्तद्देवताप्रीत्यर्थं कलशपूजां कुर्यात् ॥ स्वगृ
ह्योक्तप्रकारेणाग्निं प्रतिष्ठाप्य प्राणानायम्य देशकालौ स्मृत्वा परमेश्वरप्रीत्यर्थं मूढगर्भशां
तिहोमं करिष्ये ॥ इत्यादिवरदो नामाग्निः विष्णुर्देवता चरुर्हविःउपहोमे विष्णुरुद्रलक्ष्मी
देवता समिच्चर्वाज्यद्रव्यैः विष्णुसूक्तरुद्रसुक्तपुरुषसूक्तश्रीसूक्तैश्चाष्टोत्तरशतमष्टाविंशतिमष्टस
ख्यया वा द्वादशाक्षरमंत्रेण शक्तिपंचाक्षरमंत्रेण त्र्यंबकमंत्रेण कूष्मांडशकलमाषपिष्टतिलद्र
व्येणाष्टोत्तरशतसंख्यया यक्ष्ये अग्निस्विष्टकृत् इत्यादि सद्यो यक्ष्ये ॥ अन्वाधानाद्यग्निमुखा

स० स० तं कृत्वा पक्वं जुहुयात् ॥ विष्णुगायत्र्या पक्वं हुत्वा पूर्वोक्तसूक्तैः समिच्चर्वाज्यं च हुत्वा इ॰
१४ शाक्षर्यादितिलांश्च हुत्वा स्विष्टकृदादिहोमशेषं समापयेत् ॥ ततो ब्राम्हणाः अभिषेकं कुर्युः ॥ अत्र विशेषः ॥ पंचमे पलमितं स्यात् ॥ षष्ठे सुवर्णमितं ॥ जननाद्वादशाहे तु शिशुरूपं प्रदापयेत् ॥ रजतानां सुवर्णानां शिशुं कृत्वा प्रयत्ननः ॥ कुंभास्य तु समीपस्थमन्यगोत्राय दापयेत् ॥ अभिषेकमंत्राः ॥ आयुष्यसूक्तवरुणसूक्तशिवसंकल्पअक्षीभ्यासूक्त शन्नसूक्तैरन्यैश्च पवित्रमंत्रैश्च प्रोक्षयेत् ॥ धृतवस्त्रं परित्यज्य द्विजेंद्राय प्रदायेत् ॥ ततो कुलवृद्धाः गीतवाद्यैः कलशोदकेनाभिषिच्यालंकृत्य शुभासने उपवेशयेयुः ॥ गोदानं तिलदानं च कूष्मांडं च तथैव च ॥ तथा कलशदानं च गुरवे ब्रम्हमूर्तये ॥ शिशुदानं प्रकुर्वीत ब्राम्हणानभिवादयेत् ॥ यदि शिशुर्जायेत जातकर्मादिसंस्कारं कुर्यात् ॥ दानमंत्रः ॥ ममांगे च समुत्पन्नो १४
मद्देहमलसंयुक्तः ॥ मम गोत्रात्त्यजेधस्मात्तव गोत्रे स्थितो भवेत् ॥ आयुष्यं सुखसंपत्तिस्त

वगोत्रे प्रवर्द्धते ॥ विद्यां प्रज्ञां च मेधां च श्रद्धापुष्टी तथैव च ॥ त्वत्कुलोद्धारणार्थाय सुस्थिरः शुभदो भव ॥ इतिमंत्रेण शिशुप्रतिमादानं दत्वाथगर्भाधानहोमं कुर्यात् ॥ ततो ऋतुसंवेशनादिउलूखलमुसलपूजावायनदानांतं सर्वं यथावत्कृत्वा ब्राम्हणसुवासिनीभ्यः फलतांबूलदक्षिणाश्च दत्वा ब्राम्हणान्भोजयेत् ॥ इति मानवीयसंहितायां मूढगर्भशतिरष्टादशखंडः ॥ श्रीरस्तु शुभंभवतु ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

हें पुस्तक कर्की वेंकटरमणशास्त्री सूरी. म्या. ह. सु. यांनीं तयार करून वे. रा. बूदी महाबलेश्वर भट्ट प्रो. ह. सु. यांजकरितां मुंबै नव्या हनुमानगल्लींत रा. नारायण भिकशेट खातू यांच्या छापखान्यांत छापविलें मिती माघवद्य १४ शके १८०७ पार्थिवनाम सं०

॥ इति सर्प संस्कारविधि समाप्त ॥